अग्निमभ्यर्च्य मन्त्रेण हुत्वा चाज्याहुतीः क्रती।
चक्रशङ्खगदादीनि शस्त्राण्यग्नौ प्रतापयेत्॥
ततस्तन्मन्त्रैरथावाह्य तान्यभ्यर्च्य प्रणम्य च।
गुरुं क्षमाप्य संवन्द्य भक्त्या विज्ञापयेदिदम्॥
उच्छिष्टभोजनादेव किङ्करः शरणागतः।
तप्तचक्रगदादीनि तवाङ्गानीश! धारये॥ इति॥

अथ चक्रादीनामावाहनादिमन्त्रः।

ओम् नमो भगवते सुदर्शनाय निर्वाणितसकलरिपुभुवनाय भगवन्नारायणकराम्भोरुहचरणदुर्ललिताय।

एह्येहि त्वं सहस्रार चक्रराज सुदर्शन!।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः॥

ओम् नमो भगवते पाञ्चजन्याय विष्णुशङ्खाय गम्भीरधीरध्वन्याकुलीकृतकौरववाहिनीनाथाय त्रिरेखादक्षिणावर्त्ताय त्रिप्रशस्ताय।

एह्येहि पाञ्चजन्य! त्वं नारायणकरस्थित!।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः॥

ओम् रं वं शं षं पाञ्चजन्याय नमः॥ ओम् भगवते खड्गाय नन्दकाय त्रैलोक्यपावनाय जयिने सकलसुरासुरसुन्दरीनेत्रोत्पलार्च्चिताय॥

एह्येहि खड्गरत्न! त्वं नन्दकाख्य सुरार्च्चित!।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः॥

ओम् खड्गाय नमः॥ ओम् नमो भगवत्यै कौमोदक्यै गदायै दानवेन्द्रनिसूदनायै भगवद्भट्टारकवासुदेवलालितायै।

एह्येहि त्वं गदे! देवि कौमोदक्यायुधेश्वरि!।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः॥

ओम् रं सं चं कं खं गदायै नमः॥ एवं पद्माय नमः। सशराय शार्ङ्गाय नमः। इति॥ * ॥

अथ धारणमन्त्रः।

सुदर्शन! महाज्वाल सूर्य्यकोटिसमप्रभ!।
अज्ञानान्धस्य मे नित्यं विष्णोर्म्मार्गं प्रदर्शय॥

तथा।

पाञ्चजन्य! निजध्वानध्वस्तपातकसञ्चय।
पाहि मां पापिनं घोरसंसारार्णवपातिनमिति॥
इत्युच्चारयन् मन्त्रं दक्षिणादिक्रमेण तु।
भुजयोश्चक्रपूर्व्वाणि शस्त्रास्त्राणि धारयेत्॥
कण्ठादिपरीवारान् निजान् सर्व्वांश्च वैष्णवः।
भगवत्यर्पयेत् तप्तमुद्राभिस्ताभिरङ्कयेत्॥

तथा च। वाराहे।

अङ्कयेत्तप्तचक्राद्यैरात्मनो बाहुमूलयोः।
कलनापक्षभक्षेषु पञ्चादिषु च सम्पदे॥

किञ्च।

आयसं विधिवत् कृत्वा यथायुधविधानतः।
तत्तन्मन्त्रेण मन्त्रज्ञः प्रतिष्ठाप्य पृथक् पृथक्॥
ललाटे च गदा धार्य्या मूर्द्ध्नि चापं शरस्तथा।
नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये॥

किञ्च।

दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्।
सव्ये च शङ्खं बिभृयादिति ब्रह्मविदो विदुः॥

अथ चक्रादिप्रतिकृतिविन्यसनम्। [illegible]राणि।

सौवर्णं राजतं ताम्रं कांस्यमायसमेव वा।
चक्रं कृत्वा तु मेधावी धारयेत विचक्षण इति॥
एवमेव प्रबोधिन्यां द्वादश्यां भगवत्परैः।
तप्तमुद्रा ध्रुवं धार्य्या द्वारकायां विशेषतः॥

इति श्रीहरिभक्तिविलासे १५ विलासः॥

तप्तरूपकं, क्ली, (तप्तं वह्निशोधितं रूपकं रूप्यम्।) शुद्धरौप्यम्। इति राजनिर्घण्टः॥

तप्तसूर्म्मिकुण्डं, क्ली, (तप्ता अग्निमयी सूर्म्मिः लौहप्रतिमूर्त्तिर्यत्र। तथाविधं कुण्डं यस्मिन्।) नरकविशेषः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

तप्तसुराकुण्डं, क्ली, (तप्तायाः सुरायाः कुण्डमिव।) नरकविशेषः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

तम, उ इर् भ य खेदे। इच्छायाम्। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्।) उ, तमित्वा तान्त्वा। इर्, अतमत् अतमीत्। अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये। भ य, ताम्यति लोकः उत्तप्तः स्यादित्यर्थः। इति दुर्गादासः॥

तमं, क्ली, (ताम्यत्यस्मादनेन वा। तम+अपादाने करणे वा संज्ञायां घः।) अन्धकारः। इति शब्दरत्नावली॥ पादाग्रम्। इति शब्दचन्द्रिका॥

तमः, पुं, (ताम्यत्यनेनेति। तम+संज्ञायां घः।) तमोगुणः। इत्यमरटीकायां रायमुकुटः॥ तमालवृक्षः। इति शब्दचन्द्रिका॥ (राहुः। इत्यमरः।१।३।२६। यथा, ज्योतिषे होरायाम्। "भृगुतनयबुधजीवैरिति। कितवतमसेति वराहः॥" इति उणादिवृत्तिटीकायां उज्ज्वलदत्तः। ४।१८८॥)

तमः, [स्] क्ली, (ताम्यत्यनेनेति। तम+"सर्व्वधातुभ्योऽसुन्।" उणां। ४।१८८। इति असुन्।) प्रकृतेर्गुणविशेषः। यथा,—

"सत्त्वं रजस्तम इति इष्यन्ते पुरुषे गुणाः।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि॥
प्रभूतश्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रतिः॥
यदा कर्म्मसु काम्येषु शक्तिर्यशसि देहिनाम्।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक!॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः।
कर्म्मणाञ्चापि काम्यानां द्वापरस्तद्रजस्तमः॥
यदा सदानृतं तन्द्री निद्राहिंसादिसाधनम्।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः॥"

इति गारुडे २२७ अध्यायः॥ * ॥

अपि च।

"तमस्त्वज्ञानजं विद्धि मोहनं सर्व्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत!॥
सत्त्वं सुखे सञ्जयति रजः कर्म्मणि भारत!।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत॥
रजस्तमश्चाभिभूय सत्त्वं भवति भारत!।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा॥"
"अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन!॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्।
तदोत्तमविदां लोकानमलान् प्रतिपद्यते॥
रजसि प्रलयं गत्वा कर्म्मसङ्गिषु जायते।
तथा प्रलीनस्तमसि मूढयोनिषु जायते॥
कर्म्मणः सुकृतस्याहुः सात्त्विकं निर्म्मलं फलम्।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम्॥
सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥
ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः॥"

इति श्रीभगवद्गीतायाम्। १४। ८-१८॥

तत्तु आवरकं मोहहेतुः। इत्यमरभरतौ॥ अस्य कार्य्यं संहारः। इति श्रीधरस्वामी॥ तस्य धर्म्मो यथा। प्रमादः १ मोहः २ भयम् ३ क्लान्तिः ४ विषादः ५ शोकः ६ अरतिः ७ अनार्य्यता ८। इति मोक्षधर्म्मः॥ श्रमः ९ तन्द्रा १०। इत्याश्वमेधिकपर्व्व॥ अन्धकारः। (यथा, महाभारते। १।१०५।१०।
"तमसा लोकमावृत्य नौगतामेव भारत!॥")
तत्पर्य्यायः। तमसम् २ निशाचर्म्म ३ नीलपङ्कम् ४ रजोबलम् ५ दिवान्तकः ६ वियद्भूतिः ७ खलुक् ८ हवः ९। इति त्रिकाण्डशेषः॥ रजोरसम् १० दिनान्तरम् ११ अन्धकम् १२। इति शब्दरत्नावली॥ अमरोक्तपर्य्यायोऽन्धकारशब्दे द्रष्टव्यः॥ शोकः। इति मेदिनी। से, २४॥ पापम्। इति हेमचन्द्रः॥ (राहुः। इति मेदिनी। से, २४॥ यथा, रघुः। ८।३७।

"निमिमील नरोत्तमप्रिया
हृतचन्द्रा तमसेव कौमुदी॥")

तमङ्गकः, पुं, इन्द्रकोषः। मञ्चकः। इति हेमचन्द्रत्रिकाण्डशेषश्च॥

तमतः, त्रि, (तम+"भृमृदृशियजिपर्व्विपच्यमितमीति।" उणां। ३।११०। इति अतच्।) तृषितः। वाञ्छितः। इत्युणादिकोषः॥

तमप्रभः, पुं, (तम इव प्रभाऽस्य अस्मिन् वा।) नरकभेदः। इति हेमचन्द्रः॥

तमरं, क्ली, (तमं रातीति। रा+कः।) वङ्गम्। इति हेमचन्द्रः॥

तमराजः, पुं, (तम इव राजते। राज+अच्।) शर्कराविशेषः। नवात इति ख्यात इति केचित्। तत्पर्य्यायः। शालकः २। तस्य गुणः। तृष्णाज्वरदाहरक्तपित्तनाशित्वम्। इति राजवल्लभः॥

तमसं, क्ली, (तम+"अत्यविचमितमीति।" उणां। ३।११७। इति असच्।) अन्धकारः। इति त्रिकाण्डशेषः॥ नगरम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

तमसः, पुं, (तम+असच्।) कूपः। अन्धकारः। इति संक्षिप्तसारे उणादिवृत्तिः॥

तमसा, स्त्री, (तम इव जलमस्यस्याः। अच् टाप् च।) नदीविशेषः। इति संक्षिप्तसारे उणादिवृत्तिः॥ (यथा, महाभारते। ३।२२१।२४।
"तमसा नर्म्मदा चैव नदी गोदावरी तथा॥")